International Journal of Sanskrit Research 2020; 6(5): 133-137

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 133-137
© 2020 IJSR
www.anantaajournal.com
Received: 22-07-2020
Accepted: 23-08-2020

**मृत्युञ्जयगराँइ**
शोधछात्रः, संस्कृत-पालि-प्राकृतविभागः, विश्वभारती, शान्तिनिकेतनम्, पश्चिमबङ्गः, भारत

**अर्जुनकुमारः**
अतिथि-अध्यापकः (SACT), संस्कृत-विभागः, जे.के. कलेज, पुरुलिया, पश्चिमबङ्गः, भारत

Corresponding Author:
**मृत्युञ्जयगराँइ**
शोधछात्रः, संस्कृत-पालि-प्राकृतविभागः, विश्वभारती, शान्तिनिकेतनम्, पश्चिमबङ्गः, भारत

# सर्वङ्कषाटीकायां व्याकरणालोचने वामनमतानां प्रयोगसमीक्षणम्

## मृत्युञ्जयगराँइ एव अर्जुनकुमारः

**शोधसारः**
संस्कृतवाङ्मये महाकविमाघप्रणीतं शिशुपालवधं खलु अतीव जनप्रियमहाकाव्यम् । महाकाव्यस्यास्य सम्यगर्थबोधे 'सर्वङ्कषा' नाम्नी टीका सुप्रसिद्धा । अन्वयमुखेन टीकायामस्यां सर्वेषां श्लोकानां हृदयग्राही व्याख्या प्रदत्ता । तथाच माघकाव्यस्य बहुविधानां ख्यात-अख्यात-दुरुहशब्दानां पदानां वा युक्तिनिष्ठं व्याकरणालोचनमत्र परिदृष्टम् । अस्य व्याकरणालोचनस्य शुद्धताप्रतिपादने कदापि कुत्रापि मल्लिनाथेन प्रथितयशसामाचार्याणां मतान्यपि प्रकटितानि । तेषु वामनमतानि अन्यतमानि । एषां वामनमतानां प्रयोगः किल युक्तियुक्तः तथा प्रामाणिकोऽस्ति न वेति शङ्का सततमुपजायते । एवं शङ्कानिवारणेऽत्र प्रयत्नो कृतः ।

**कुञ्ची-शब्दाः** महाकाव्यम्, टीका, व्याकरणम्, अभिधानम्, काव्यालंकारसूत्रवृत्तिः, लिङ्गम्, अव्ययम्, आहितम्, बाहुलकविधानम् ।

## प्रस्तावना

संस्कृतमहाकाव्यधारायां शिशुपालवधं नाम महाकाव्यं विद्वद्समाजे खलु विशेषादृतम् । माघकाव्यं तावदस्य अपरं नाम । विंशतिसर्गात्मकस्य महाकाव्यस्यास्य रचना तु महाकविमाघेन महाभारतीयां कथामाश्रित्य विहिता । यदुनन्दनोऽत्र नेता, वीररस्तु अङ्गीरसः । शब्दवैचित्र्यं खलु महाकाव्यस्यास्य महदाकर्षणम् । काव्येऽस्मिन् कवेः शाब्दिकप्रौढिमा दृश्यते प्रतिपदम् । कविवरमाघस्य शब्दशैली नितरां मुग्धीकरोति सर्वान् सहृदयान् । अतः सहृदयानां समीपे माघकाव्यस्यावेदनमतीव जनप्रियम् । अत्यधिकजनप्रियत्वात् महाकाव्यस्यास्य सन्ति अनेकाष्टीकाः । तासु 'सर्वङ्कषा' नाम्नी टीका विद्वद्समाजे भूयसी प्रशंसिता । दक्षिणभारतीय-महोपाध्याय-कोलाचल-मल्लिनाथसूरी अस्याः टीकायाः कर्ता । टीकायामस्यामन्वयमुखेनैव माघकाव्यस्य सर्वश्लोकानां रुचिरा व्याख्या प्रदत्ता । तथा च प्रसङ्गानुसारेणात्र अलंकार-व्याकरण-दर्शन-काम-कोष-धर्म-सङ्गीत-ज्योतिष-नीतिशास्त्रादीनामालोचनाऽपि परिदृश्यते । एवमालोचना न तु अमूलका अपि तु युक्तिसन्मता प्रासङ्गिकी चेति । तथोक्तम् मल्लिनाथेन-

"इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ।।" [1]

वस्तुतस्तु एषु आलोचनेषु व्याकरणात्मिकालोचना अतीव मनोग्राही । सुदक्षवैयाकरणवत् मल्लिनाथोऽप्यत्र शिशुपालवधस्य बहुनां ख्यात-अख्यात-दुरूहशब्दानां पदानां वा व्याकरणालोचनं प्रयच्छति । तस्य व्याकरणव्याख्या तु पाणिनीयप्रस्थानानुसारी । पाणिनि-कात्यायन-पतञ्जलीनां मतमत्र सर्वथानुसृतम् । कदापि दुरुहपदव्याख्यानकाले

स्वमतस्य समर्थने मल्लिनाथेन बहुत्र जिनेन्द्रबुद्धि-कैयट-क्षीरस्वामी-वामन-भट्टमल्लादीनां मतान्यपि प्रदत्तानि। तत्र वामनाचार्यस्याभिमतानि बाहुल्येनोपस्थाप्यन्ते । वस्तुतः वामनप्रणीतस्य 'काव्यालंकारसूत्रवृत्तिः' इत्यस्य ग्रन्थस्य 'प्रायोगिकः' नाम पञ्चमाधिकरणस्य मतानि एव परिदृष्टानि सर्वङ्कषायाम् । वामनाचार्यस्य ग्रन्थोऽयं यद्यपि अलंकारशास्त्रसम्बन्धितः ग्रन्थः, तथापि ग्रन्थस्यास्य पञ्चमेऽधिकरणे शब्दशुद्धिरपि आलोचिता । एवं वामनमतानां प्रयोगोऽत्र किल युक्तियुक्तः तथा प्रामाणिकोऽस्ति न वेति विषयः तु अपेक्षितोऽस्ति। अतएव लेखेऽस्मिन् विश्लेषणसहयोगेन विषयोऽयं सम्यकतया उपस्थाप्यते।

## १. "क्रमादमूं नारद इत्यबोधि सः।"(शिशु. १/३)

शिशुपालवधस्य पद्येऽस्मिन् 'नारदः' इति पदस्य व्याकरणव्याख्यायां सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम्-
"नारद इत्यबोधि, नारदं बुद्धवानित्यर्थः । नारदस्य कर्मत्वेऽपि निपातशब्देनाभिहितत्वान्न द्वितीया । तिङामुपसंख्यानस्योपलक्षणत्वात् । यथाह वामनः - 'निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात्' इति।"
अत्र बुध्-धातोः कर्म 'नारद' इति शब्दः । अतः "अनभिहिते"(२/३/१)-सूत्रस्याधिकारे "कर्मणि द्वितीया"(२/३/२) इति सूत्रेणात्र कर्मणि द्वितीयायाः प्राप्तिरस्ति । परन्तु 'इति' अव्ययेन 'नारद' इति शब्दोऽभिहितत्वात् तत्र न द्वितीया, अपि तु प्रथमा स्यात्। निपातेनाभिधानविषये नास्ति पाणिनीयसूत्रम् । विषयेऽस्मिन् वार्तिकसूत्रमस्ति । तद् यथा- "तिङ्कृत्तद्धितसमासैः परिसंख्यानम्" इति। साधारणतोऽत्र तिङ्-कृत्-तद्धित-समासानाम् अभिधानत्वं प्रतिपादितम् । तथापि 'परिसंख्यानम्' इति पदस्योपलक्षणत्वादत्र निपातेनापि अभिधानं भवति। 'सिद्धान्त-कौमुदी' इति ग्रन्थे उक्ते वार्तिकसूत्रे 'प्रायेण' इति पदं संयोजितम् भट्टोजिदीक्षितेन । अतः "क्वचिन्निपातेनाभिधानम्" इति वृत्तिना निपातस्यापि अभिधानमुल्लिखितम्। विषयेऽस्मिन् वामनाचार्येनापि सुचारुसूत्रं प्रदर्शितम्। तद् यथा –

"निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात्।" [2]

टीकाकारमल्लिनाथेन सूत्रमिदं समुद्धृतम् । अनेन सूत्रेण निपातेन यदभिधानं भवति तत्तु प्रायिकं भवति। अर्थात् क्वचित् कदाचिदभिधानं भवति। अभिधानेऽस्मिन् कर्मणि न द्वितीया, अपि तु "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" (२/३/४६) [3] इति सूत्रेण प्रथमाविभक्तिर्भवति । अतएव शिशुपालवधस्य 'नारदः' इति पदमभिहितत्वात् प्रथमायाः प्रयोगः युक्तिसङ्गतः । वामनमतेन विषयोऽयं सम्यकतया प्रकाशितः।

## २. "कुथेन नागेन्दमिवेन्द्रवाहनम्।"(शिशु.१/८)

इन्द्रवाहनम्
सर्व० "इन्द्रस्य वाहनमिति स्वस्वामिभावमात्रस्य विवक्षितत्वात् 'वाहनमाहितात्' इति न णत्वम् । यथाह वामनः- 'नेन्द्रवाहनशब्दे णत्वमाहितत्वस्याविवक्षितत्वात्' इति।"
"वाहनमाहितात्"(८/४/८) इत्यनेन सूत्रेण आहितवाची यत् पूर्वपदं तत्स्थान्निमित्तादुत्तरस्य वाहननकारस्य ण-कार आदेशो भवति । अस्मिन् स्थले इन्द्रवाहनशब्दे णत्वस्य निमित्तम्(र्) अस्ति। परन्तु आहितार्थ [4] अविवक्षितोऽस्ति। अर्थात् 'इन्द्र-स्वामिक-वाहनम्' इत्येवमर्थोऽत्र प्रकाशितः । अतोऽत्र न-कारस्य ण-कारः आदेशो न भवति । एवं व्याख्यायाः समर्थने टीकाकारेण मल्लिनाथेन वामनाचार्यस्य मतमुद्धृतम् । मतमिदं किञ्चिद् अन्यप्रकारेण प्राप्तं 'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थे । अत्र प्राप्तसूत्रम् एवमेवास्ति-

"नेन्द्रवाहने णत्वमाहितत्वस्याविवक्षितत्वात् ।" (का.सू.वृ.५/२/९१)

अर्थात् वामनमतेऽपि आहितत्वस्याविवक्षितत्वात् 'इन्द्रवाहन'-शब्दे णत्वं न भवति। अतएवात्र णत्वाभावोऽपि युक्तिसम्मतः। वामनमतेन विषयोऽयं स्पष्टीकृतः।

## ३. "मनुष्यजन्मापि सुरासुरान्गुणैः।"(शिशु.१/३५)

मनुष्यजन्मा
सर्व० "मनुष्याज्जन्म यस्य स मनुष्यजन्मा भवान्। 'अवर्ज्यो हि बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः' इति वामनः।"
'मनुष्यात् जन्म यस्य, सः'- इत्यस्मिन् विग्रहे षष्ठ्यर्थेऽत्र 'मनुष्यात्' इति पञ्चम्यन्तपदेन सह प्रथमान्तस्य 'जन्म'-पदस्य व्यधिकरणबहुव्रीहिसमासो भवति । सामान्यतः समानाधिकरणपदानामेव समासोऽयं भवति । कदापि कुत्रापि व्यधिकरनपदानामेव बहुव्रीहिसमासः लक्ष्यते । परन्तु व्यधिकरणबहुव्रीहिसमासविषये स्पष्टतया किञ्चित् पाणिनीयसूत्रं नोपलभ्यते । तथापि "सप्तमीविशेषणे बहुव्रीहौ"(२/२/३५) [5] इति ज्ञापकसूत्रं तत्र दृश्यते । व्यधिकरणबहुव्रीहिसमासविषये वामनाचार्यस्य सूत्रमस्ति-

"अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः।"(का.सू.वृ.५/२/१८)

सूत्रमिदं मल्लिनाथेन सर्वङ्कषाटीकायामुद्धृतम् । अनेन सूत्रेणैव 'मनुष्यजन्मा' इति पदे व्यधिकरणबहुव्रीहिसमासः

मल्लिनाथेन समर्थितः । अतएव मल्लिनाथेन प्रदत्ता एवमुद्धृतिः खलु युक्तिसम्मता ।

**४. "लघुकरिष्यन्नतिभारभङ्गुरामूं किल त्वं त्रिदिवादवातरः ।"(शिशु.१/३६)**

भङ्गुराम्

सर्व० "त्वमतिभारेणोर्जेन स्वरूपेण भङ्गुरां स्वयं भज्यमानाम् । 'भञ्जभासमिदो घुरच्' । 'भङ्गुरः कर्मकर्तरि' इति वामनः ।"

शीलार्थेऽत्र भञ्ज्-धातोः कर्तरि "भञ्जभासमिदो घुरच्"(३/२/१६१) [6] इत्यनेन सूत्रेण घुरच्-प्रत्ययो विहितः । अनन्तरमनुबन्धलोपे 'भञ्ज् उर'- इत्यवस्थायां घितिपरत्वात् "चजोः कु घिण्ण्यतोः"(७/३/५२) सूत्रेण धातोः कुत्वादेशे विभक्तिकार्ये च 'भङ्गुराम्' पदं निष्पद्यते । वस्तुतः कर्मकर्तरि एव घुरच्-प्रत्ययो विहितो भवति । परन्तु अत्र कर्तरि घुरच् दृश्यते । अतएवात्र घुरच्प्रत्ययस्य विधानं कथं समर्थनीयम्? विधानमेवं समर्थनाय मल्लिनाथेन वामनाचार्यस्य मतमुद्धृतम् । सर्वङ्कषायां 'भङ्गुरः कर्मकर्तरि' इत्येवंरूपेण उद्धृतिरियं परिदृष्टा । किं बहुना इत्येवमुद्धृतिः 'काव्यालंकार-सूत्रवृत्तिः' इति ग्रन्थे कुत्रापि न दृश्यते । अनेन ग्रन्थेन परिदृष्टा उद्धृतिः एवमस्ति-

"भिदुरादयः कर्मकर्तरि कर्तरि च ।" [7]

वामनोक्तेन सूत्रेण भिदुरादयः शब्दाः कर्मकर्तरि कर्तरि च प्रयुज्यन्ते । अतएव मल्लिनाथप्रदत्तस्येवमुद्धृतिः न संशयरहिता ।

**५. "निशम्य ताः शेषगवीरभिधातुमधोक्षजः ।"(शिशु.२/६८)**

निशम्य

सर्व० "निशम्य श्रुत्वा । 'निशाम्यतीति श्रवणे तथा निशमयत्यपि' इति भट्टमल्लः । तत्र शाम्यतेरिदं रूपम् । अन्यथा निशामय्येति स्यात् । अतएव वामनः- 'निशम्यनिशमय्यशब्दौ प्रकृतिभेदात्' ।"

नि-उपसर्गपूर्वकात् दिवादेः शम्-धातोः "समासेऽनञ्पूर्वे क्त्वो ल्यप्"(७/१/३७) [8] इत्यनेन सूत्रेण ल्यप्-प्रत्यययोगे 'निशम्य' शब्दः निष्पन्नो भवति । अस्य शब्दस्यार्थः- श्रुत्वा श्रवणं कृत्वा वेति । एवमर्थे 'निशमय्य'(नि-शम्+णिच्+ल्यप्) पदमपि प्रयुक्तं संस्कृतभाषायाम् । तथापि शब्दद्वयस्य मध्ये किञ्चिदन्तरं दृश्यते । एवं वैसादृश्यं प्रतिपादयितुं मल्लिनाथेन भट्टमल्लस्य तथा वामनाचार्यस्य मतद्वयमुद्धृतम् । आचार्यभट्टमल्लमते, 'निशाम्यति' 'निशामयति' च पदद्वयं श्रवणार्थकम् । तथापि पदद्वये गणभेदः प्रकृतिभेदः वास्ति । प्रथमे पदे दिवादिगणीयः शम्-धातुरस्ति, द्वितीये तु अस्ति चुरादिगणीयः शम्-धातुः । प्रकृतिभेदादेव ईदृशी भिन्नता । तथोक्तं 'आख्यातचन्द्रिका' इत्यस्य ग्रन्थस्य प्रथमकाण्डस्य बुद्धिवर्गे भट्टमल्लेन-

"चष्टे छन्दसि सम्पश्यत्यात्मने स्यादकर्मकः ।
शृणोत्याकर्णयति च तद्वन्निशमयत्यपि ।।
निशम्यतीति श्रवणे घ्राणे जिघ्रति शिङ्घति ।
स्पृशत्यामृशति स्पर्शे छुपत्यालभते च षट् ।।" [9]

अपरं तु वामनाचार्यमतानुसारेणापि शब्दद्वयस्य मध्ये प्रकृतिगतभेदः एव विवक्षितः । अतः 'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थे तेनोक्तम्-

"निशम्यनिशमय्यशब्दौ प्रकृतिभेदात् ।"(का.सू.वृ.५/२/७५)

किं बहुना, सूत्रस्यास्य वृतौ अपि स्पष्टीक्रियते तेन-

"निशम्य निशमय्येत्यतौ शब्दौ श्रुत्वेत्येतस्मिन्नर्थे । शमेः ल्यपि 'ल्यपि लघुपूर्वात्' इत्ययादेशे सति निशमय्येति भवितव्यम्, न निशम्यति । आह- प्रकृतिभेदात् । शमैर्दैवादिकस्य निशम्येति रूपम् । 'शमो दर्शने' इति चुरादौ णिचि मित्संज्ञकस्य निशम्येति रूपम् ।"

अतएव 'निशम्य' इत्यस्य पदस्य मूलेऽस्ति दिवादिगणीयः शम्-धातुः । अन्यथा पदमिदं 'निशमय्य' इति रूपं प्राप्स्यति । वामनमतेन भट्टमल्लमतेन च एवं व्याख्या अतीव युक्तिपूर्णा ।

**६. "यियासतस्तस्य महीध्ररन्ध्रभिदापटीयान्पटहप्रणादः।"(शिशु.३/२४)**

महीध्राः

सर्व० "तस्य हरेः सम्बन्धी महीं धरन्तीति महीध्राः पर्वताः । मूलविभुजादित्वात्कप्रत्ययः । यदाह वामनः- 'महीध्रादयो मूलविभुजादिदर्शनात्' इति ।"

'महीं धरन्ति'- इत्यस्मिन् विग्रहे 'महीम्' इत्युपदात् भृधातोः "कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्'(वा.१९८९) इत्यनेन वार्तिकेनात्र कप्रत्ययः विहितः । तदनन्तरमनुबन्धलोपे 'मही धृ अ' इति स्थिते कित्वात् गुणनिषेधे सन्धिकार्ये च महीध्रशब्दः निष्पद्यते । शब्दोऽयं तु मूलविभाजादि-आकृतिगणे पठ्यते । मूलविभाजादिशब्दः कप्रत्यययोगेन निष्पन्नः । परन्तु प्रसङ्गेऽस्मिन् पाणिनीयसूत्रं नोपलभ्यते । वार्तिकसुत्रं प्राप्यते । तथा च वामनीयसूत्रमपि दृश्यते । टीकाकारेण मल्लिनाथेनात्र वार्तिकसूत्रेण सह वामनीयसूत्रमपि उल्लिखितम् । वामनोक्तं सूत्रं तावत्-

"महीध्रादयो मूलविभुजादिदर्शनात् ।"(का.सू.वृ.५/२/३४)

अर्थात् वामनाचार्यमतेनापि महीध्र-धरणीध्रादयः शब्दाः मूलविभाजादिदर्शनात् क-प्रत्यये निष्पद्यन्ते । अतएव

मल्लिनाथेन प्रदत्ता वामनोक्ता उद्धृतिरत्र युक्तियुक्ता तथा प्रासङ्गिकी च।

**७. "व्रीडमसंमुखोऽपि रमणैरपहृतवसना।"(शिशु. ४/६७)**

शिशुपालवधस्य पद्येऽस्मिन् 'व्रीडम्' इति पदस्य लिङ्गं प्रतिपादयन् सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम् -

"व्रीडं त्रपाम्। यद्यपि 'गुरोश्च हलः' इति स्त्रियामप्रत्ययः। तथापि तत्र स्त्रित्वाविवक्षायां बाहुलकत्वान्नपुंसकत्वं च। अतएव 'अविधौ गुरोः स्त्रियां बहुलविवक्षा' इति वामनः।"

"गुरोश्च हलः"(३/३/१०३) [10] इत्यनेन सूत्रेण हलन्त-व्रीड्-धातो अ-प्रत्ययो विहितः। स्त्रीलिङ्गे अ-प्रत्यये कृते टाप् इति प्रत्ययेन 'व्रीडा' ईदृशं स्त्रीलिङ्गान्तं पदं भविष्यति। परन्तु अत्र 'व्रीडम्' एतादृशं क्लीवलिङ्गान्तं पदं प्रयुक्तमस्ति। अतः स्त्रीलिङ्गे अ-प्रत्ययोऽत्र कथं समर्थनीयः ? प्रसङ्गेऽस्मिन् टीकाकारमल्लिनाथस्य मतमस्ति, 'व्रीडम्' इत्यस्मिन् पदे स्त्रीत्वस्याविवक्षा लक्ष्यते। पुनश्च अ-प्रत्ययोऽपि बाहुलकविधानानुसारेण प्रयुक्तो भवति। व्याख्यामेनां समर्थयितुं टीकाकारमल्लिनाथेन वामनाचार्यस्योद्धृतिः प्रदत्ता। तद् यथा-

"अविधौ गुरोः स्त्रियां बहुलविवक्षा।"(का.सू.वृ. ५/२/४९) इति।

वामनचार्यस्य मते, "गुरोश्च हलः"(३/३/१०३) इति पाणिनीयसूत्रं तावद् बाहुलकत्वाद् प्रयुक्तं भविष्यति। अतएव शिशुपालवधस्य 'व्रीडम्' इति क्लीवलिङ्गान्तस्य पदस्य प्रयोगः युक्तिसङ्गतोऽस्ति। वामनमतेन विषयोऽयं मनोज्ञरूपेण प्रतिपाद्यते।

**८. "गण्डूषमुज्झितवता पयसः सरोषम्।" (शिशु.५/३६)**

गण्डूषम्

सर्व० "गण्डूषं मुखपूरणम्। मुखान्तर्गतं पय इत्यर्थः। द्विलिङ्गित्वेऽपि पुंलिङ्गमेवाह वामनः- 'लिङ्गाध्याहारौ' इत्यत्र।"

संस्कृतभाषायां 'गण्डूष' इति शब्दः पुंलिङ्गे तथा स्त्रीलिङ्गे प्रयुज्यते। वस्तुतः पुंलिङ्गे एव अस्य प्रयोगबाहुल्यमस्ति। पद्येऽस्मिन् महाकविमाघेनापि शब्दोऽयं पुंलिङ्गे प्रयुक्तः। एवं कारणव्याख्यायां टीकाकारेण मल्लिनाथेन वामनाचार्यस्याभिमतमुल्लिखितम्। वामनमते, अतिप्रयुक्तौ लिङ्गाध्याहारौ प्रयोज्याविति। यथोक्तं तेन-

"लिङ्गाध्याहारौ।"(का.सू.वृ.५/१/१४)

सूत्रस्यास्य वृत्तौ अपि सम्यकतया वामनेनोक्तम्-

"लिङ्गं च अध्याहारश्च लिङ्गाध्याहारौ अतिप्रयुक्तौ प्रयोज्याविति। लिङ्गं यथा- 'वत्से मा बहु निःश्वसीः कुरु सुरागण्डूषमेकं शनैः'। इत्यादिषु गण्डूषशब्दः पुंसि भूयसा प्रयुक्तः न स्त्रियाम्, आम्नातोऽपि स्त्रीत्वे।"

अर्थात् 'गण्डूष'-शब्दस्तावत् पुंलिङ्गेऽतिप्रयुक्तः। अतएव पुंलिङ्गेऽत्र शब्दस्यास्य प्रयोगः युक्तियुक्तः। वामनमतेन एवं व्याख्या सुसमृद्धा।

**९. "नहि न विदितखेदमेतदीयस्तनजघनोद्वहने तवापि चेतः।"(शिशु.७/१२)**

शिशुपालवधस्य पद्येऽस्मिन् 'न' इति अव्ययद्वयस्य युगपत् प्रयोगोऽस्ति। अव्ययद्वयस्यास्य अर्थविश्लेषणे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम् -

"नहीति। तव चेतोऽपि एतदीयस्तनजघनोद्वहने विदितखेदमनुभूतखेदं नेति न, किन्तु वेत्त्येवेत्यर्थः। अतः कथं शीघ्रमायास्यतीति भावः। 'संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति वामनः।"

पद्येऽस्मिन् दृश्यते, नायिकां विहाय स्वाभिमानवशात् नायकः पदसञ्चालनेन शीघ्रं गच्छति। नायिका तु शनैः शनैः तस्य पश्चादागच्छति। उन्नतपयोधरेण नितम्बवहनश्रमेन चैव नायिकाया ईदृशी धीरगतिः। अस्याः कारणमपि नायकस्य खलु सुविदितम्। भावमेनं सम्यक् प्रतिपादयन् पद्येऽस्मिन् महाकविमाघेन 'न' इति अव्ययद्वयस्य युगपत् प्रयोगः कृतः। 'न' इति अव्ययपदं तावद् प्रतिषेधार्थत्वम्। तथापि एकस्मिन् वाक्ये प्रतिषेधद्वयस्य प्रयोगे सति सम्भावनिषेधस्य निवर्तनं भवति। प्रसङ्गेऽस्मिन् टीकाकारमल्लिनाथेन वामनाचार्यस्योद्धृतिः प्रदत्ता। तद् यथा -

"संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ।"( का.सू.वृ. ५/१/९) इति।

वामनाचार्यस्य मतेऽपि प्रतिषेधद्वयेन सम्भावनिषेधस्य निवर्तनं भवति। अतः पद्येऽस्मिन् 'न' इति अव्ययपदद्वयस्य युगपत् प्रयोगेन सम्यकतया नायकस्य विदितार्थस्य भावः प्रकाशितो भवति। वामनमतेन भावोऽयं सम्यकतया उपस्थाप्यते।

**१०. "इव नितरां नतिमद्भिरंसभागैः।"(शिशु.७/६२)**

इव

सर्व० " 'न पादादौ खल्वादयः' इति वामनीयनिषेधेऽपि 'इव' शब्दस्य पादादौ प्रयोगः कवेरौद्दण्ड्यात्।"

पद्यं तावत् चतुष्पदी। संस्कृतभाषायां कस्यचित् पद्यस्य चरणाग्रे खलु-इव-किलादीनां प्रयोगः सर्वदा अनुचितः। श्रुतिविरसत्वात् उक्तानि पदानि चरणस्य प्रथमे तु न प्रयुज्यन्ते। प्रसङ्गेऽस्मिन् वामनाचार्यस्य निषेधसूत्रमस्ति। 'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थे वामनेनोक्तम्-

"न पादादौ खल्वादयः।"(का.सू.वृ.५/१/५)

सर्वङ्कषाटीकायां टीकाकारेण मल्लिनाथेन एवमुद्धृतिः प्रदत्ता। अर्थात् वामनाचार्यमतानुसारं पादादौ खल्वादयः शब्दाः न प्रयोज्याः। आदिशब्दः प्रकारार्थः। येषामादौ प्रयोगो न श्लिष्यति ते गृह्यन्ते, न पुनर्वत-हन्त-प्रभृतयः। संस्कृतशब्दशास्त्रे एवं निषेधेऽपि महाकविमाघेन पद्यस्यास्य चरणाग्रे 'इव'-पदस्य प्रयोगः कृतः। एवं कारणव्याख्यायां टीकाकारेण मल्लिनाथेन कविगणं प्रति उदारदृष्टिः प्रदत्ता। साहित्यसृजने कवि-महाकवीनां पराधीनता नास्ति। अपारे काव्यसंसारे कविरेव प्रजापतिः। व्याकरणशृङ्खलमपि कदापि तेषां न शृङ्खलितम्। कविगणं प्रति वैयाकरणानां ईदृशी उदारदृष्टिः भूयसी प्रशंसनीया। अतः चरणाग्रेऽत्र 'इव' इति पदस्य प्रयोगस्य प्रामादिकता न धर्तव्या अपितु सादरेणैव ग्रहणीया।

## उपसंहृतिः

शिशुपालवधमहाकाव्यस्य 'सर्वङ्कषा' नाम्नी टीका खलु पण्डितसमाजेऽतीव जनप्रिया। माघकाव्यस्य सम्यगर्थबोधे रसबोधो च यस्याः महती भूमिकाऽस्ति। टीकायामस्यां शिशुपालवधस्य बहुविधानां शब्दानां पदानां वा व्याकरणगतालोचनं बहुत्र परिलक्षितम्। इदमालोचनं केवलं व्याकरणस्योल्लेखमात्रं नास्ति, अपि तु व्याकरणस्य भावगम्भीरविश्लेषणस्य युक्तिनिष्ठं चिन्तनमस्ति। शब्दानां तथा पदानां अर्थबोधे एवं चिन्तनमतीव प्रशंसनीयम्। मल्लिनाथस्य व्याख्या तु सर्वदा शुद्धपाणिनीयव्याकरणानुसारी। त्रिमुनिव्याकरणस्य विविध-सूत्र-वार्तिक-भाष्यानां प्रयोगः छत्रे छत्रे दृश्यते सर्वङ्कषाटीकायाम्। एतस्मादृते बहुविधदुरुहशब्दानां विश्लेषणावसरे काशिका-न्यास-प्रदीप-काव्यालंकारसूत्रवृत्ति-आख्यातचन्द्रिकादीनां ग्रन्थानां सिद्धान्तोऽप्यत्र समुपन्यस्तः। तत्र वामनाचार्यस्य 'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थस्योल्लेखः सर्वाग्रे करणीयः। स्वीयमतस्य समर्थने मल्लिनाथेन बहुत्र वामनाचार्यस्याभिमतं प्रदत्तम्। एवमभिमतं तु प्रायेण युक्तिनिष्ठं तथा प्रामाणिकम्। किञ्चित् वामनोक्तं मतमत्र ईषत् परिवर्तनेन सह प्राप्यते। अन्यथा मतविषये कुत्रापि कश्चित् सन्देहो नास्ति। व्याकरणशास्त्रेऽप्रतिमज्ञानाद् ऋते एवं मतस्योपस्थापनं हि असम्भवम्। अतएव संस्कृतभाषायां मल्लिनाथः खलु महावैयाकरणः आसीत्- इति वक्तुं शक्यते।

## तथ्यसूत्राणि

1. सर्वङ्कषा, भूमिकाश्लोकः ८।
2. काव्यालंकारसूत्रवृत्तिः, ५/२/२२।
3. "नियतोपस्थितिकः प्रातिपदिकार्थः। मात्राशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात्।" (सि.कौ./कारकप्रकरणम्)।
4. "वाहने यदारोपितमुह्यते तदाहितमुच्यते।" ('वाहनमाहितात्'८/४/८ सूत्रस्य काशिकावृत्तिः)।
5. "सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात्। अतएव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः।" (लघुसिद्धान्तकौमुदी/समासप्रकरणम्)।
6. "भञ्ज भास मिद इत्येतेभ्यो घुरच्प्रत्ययो भवति तच्छीलादिषु कर्तृषु।" (काशिकावृत्तिः)।
7. काव्यालंकारसूत्रवृत्तिः ५/२/३८।
8. "समासेऽनञ्पूर्वे क्त्वा इत्येतस्य ल्यपित्ययमादेशो भवति।" (काशिकावृत्तिः)।
9. आख्यातचन्द्रिका, १/२/५४-५५।
10. "गुरुमतो हलन्तात् स्त्रियामकारः स्यात्।"(लघु.सि.कौ./उत्तरकृदन्तम्)।

## सन्दर्भग्रन्थाः


1. त्रिपाठी, जयशङ्करलाल सुधाकरमालवीय च सम्पादकौ। *काशिका* (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)। वाराणसी: तारा प्रिण्टिङ्ग वर्क्स, प्रथमभागः १९८६, द्वितीयभागः १९८६, चतुर्थभागः१९८४।
2. दुर्गाप्रसाद सम्पादकः। शिवदत्तेन वासुदेवेन च संशोधितम्। *शिशुपालवधम्*(सर्वङ्कषाटीका-समेतम्)। बोम्बे : निर्णयसागरप्रेस, १९०५।
3. नगेन्द्र सम्पादकः। *काव्यालंकारसूत्रवृत्तिः*। दिल्ली : आत्माराम एण्ड संस, १९५४।
4. भट्टाचार्य्य, तपनशङ्कर, सम्पादकः। *लघुसिद्धान्तकौमुदी*। कोलकाता : संस्कृत बुक डिपो, २००४।
5. मिश्र, रमाशंकर, सम्पादकः। *अष्टाध्यायीसूत्रपाठः*। दिल्ली : मोतीलाल बनारसीदास, २००५।
6. रङ्गनाथस्वामी, हरगोविन्द च सम्पादकौ। *आख्यातचन्द्रिका*। वाराणसी : चौखम्बा संस्कृत सीरीज आफीस, १९३६।
7. शर्मा, गिरीधर, परमेश्वरानन्दशर्मा च सम्पादकौ। *वैयाकरणसिद्धान्तकौमुदी*(बालमनोरमा-तत्त्वबोधिनी-समेता)। दिल्ली : मोतीलाल बनारसीदासः, प्रथमभागः १९७७, द्वितीयभागः १९८२, तृतीयभागः १९७७, चतुर्थभागः १९७९।